শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৫১

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৫১

*অঘাসুরৱধৱর্ণনম্*

কদাচন ৱ্ৰজশিশুভিঃ সমং ভৱান্
 ৱনাশনে ৱিহিতমতিঃ প্ৰগেতরাম্।
সমাৱৃতো বহুতরৱতসমণ্ডলৈঃ
 সতেমনৈর্নিরগমদীশ জেমনৈঃ॥ ১ ॥

ৱিনির্যতস্তৱঃ চরণাম্বুজদ্ৱযা-
 দুদঞ্চিতং ত্ৰিভুৱনপাৱনং রজঃ।
মহর্ষযঃ পুলকধরৈঃ কলেবরৈ-
 রুদূহিরে ধৃতভৱদীক্ষণোতসৱাঃ॥ ২ ॥

প্ৰচারযত্যৱিরলশাদ্ৱলে তলে
 পশূন্ ৱিভো ভৱতি সমং কুমারকৈঃ।
অঘাসুরো ন্যরুণদঘায ৱর্তনীং
 ভযানকঃ সপদি শযানকাকৃতিঃ॥ ৩ ॥

মহাচলপ্ৰতিমতনোর্গুহানিভ-
 প্ৰসারিতপ্ৰথিতমুখস্য কাননে।
মুখোদরং ৱিহরণকৌতুকাদ্গতাঃ
 কুমারকাঃ কিমপি ৱিদূরগে ত্ৱযি॥ ৪ ॥

প্ৰমাদতঃ প্ৰৱিশতি পন্নগোদরং
 ক্বথত্তনৌ পশুপকুলে সৱাতসকে।
ৱিদন্নিদং ত্ৱমপি ৱিৱেশিথ প্ৰভো
 সুহৃজ্জনং ৱিশরণমাশু রক্ষিতুম্॥ ৫ ॥

গলোদৰে ৱিপুলিতৱৰ্ষ্মণা ত্ৱযা
মহোৰগে লুঠতি নিৰুদ্ধমাৰুতে।
দ্ৰুতং ভৱান্ ৱিদলিতকণ্ঠমণ্ডলো
ৱিমোচযন্ পশুপপশূন্ ৱিনিৰ্যযৌ॥ ৬ ॥

ক্ষণং দিৱি ত্ৱদুপগমাৰ্থমাস্থিতং
মহাসুৰপ্ৰভৱমহো মহো মহত্।
ৱিনিৰ্গতে ত্ৱযি তু নিলীনমঞ্জসা
নভঃস্থলে ননৃতুৰথো জগুঃ সুৰাঃ॥ ৭ ॥

সৱিস্মযৈঃ কমলভৱাদিভিঃ সুৰৈ-
ৰনুদ্ৰুতস্তদনু গতঃ কুমাৰকৈঃ।
দিনে পুনস্তৰুণদশামুপেযুষি
স্ৱকৈৰ্ভৱানতনুত ভোজনোতসৱম্॥ ৮ ॥

ৱিষাণিকামপি মুৰলীং নিতম্বকে
নিৱেশযন্ কবলধৰঃ কৰাম্বুজে।
প্ৰহাসযন্ কলৱচনৈঃ কুমাৰকান্
বুভোজিথ ত্ৰিদশগণৈৰ্মুদা নুতঃ॥ ৯ ॥

সুখাশনং ত্ৱিহ তৱ গোপমণ্ডলে
মখাশনাত্ প্ৰিযমিৱ দেৱমণ্ডলে।
ইতি স্তুতস্ত্ৰিদশৱৰৈৰ্জগতপতে
মৰুতপুৰীনিলয গদাত্ প্ৰপাহি মাম্॥ ১০ ॥

★★★★★★★★★★